**বেদান্তসম্মতং জ্ঞানেন্দ্রিয়পঞ্চকং নিরূপয়ত (5Marks)।**

শ্রীসদানন্দযোগীন্দ্রসরস্বতীপ্রণীতঃ **'বেদান্তসারঃ'** একঃ প্রকরণগ্রন্থঃ।অস্মিন্ গ্রন্থে **জ্ঞানেন্দ্রিয়পঞ্চকম্** আলোচিতম্।
জ্ঞানসাধনানি ইন্দ্রিয়াণি
জ্ঞানেন্দ্রিয়াণি-**"জ্ঞানেন্দ্রিয়াণি-শোত্র-ত্বক্-চক্ষুর্জিহ্বাঘ্রাণাখ্যানি"**।।এভ্যঃ শ্রোত্রাদিভ্যঃ শব্দাদীনাং গ্রহণং ভবতি।যথা শ্রোত্রগ্রাহ্যো গুণো শব্দঃ।ত্বগিন্দ্রিয়মাত্রগ্রাহ্যো গুণো স্পর্শঃ।চক্ষুর্মাত্রগ্রাহ্যো গুণো রূপম্।রসনাগ্রাহ্যো গুণো রসঃ। ঘ্রাণগ্রাহ্যো গুণো গন্ধশ্চ।এতেষাম্ আকাশাদীনাং সাত্ত্বিকাংশেভ্যঃ পৃথক্-পৃথগুৎপত্তিঃ। অর্থাৎ আকাশীয়সাত্ত্বিকাংশাত্ শ্রোত্রস্য, বায়বীয়সাত্ত্বিকাংশাৎ ত্বচঃ,তৈজসসাত্ত্বিকাংশাত্ চক্ষুষঃ,জলীয়সাত্ত্বিকাংশাৎ রসনায়াঃ, পার্থিবসাত্ত্বিকাংশাত্ ঘ্রাণস্য চ উৎপত্তিরিত্যভিপ্রায়ঃ।।